# सुवर्णनिधिः

पुरा एकस्मिन् नगरे चारुदत्तः नाम धनिकः आसीत् । कालान्तरे विधिवशात् सः अतीव निर्धनः जातः । दारिद्र्येण अत्यन्तं दुःखितः सः प्राणत्यागं कर्तुं निश्चितवान् ।

परन्तु तस्मिन् रात्रौ सः एकं स्वप्नं दृष्टवान् । स्वप्ने कश्चन क्षपणकः तेन दृष्टः । सः क्षपणकः उक्तवान् – 'भोः मणिभद्र, अहं भवतः पूर्विकैः सम्पादितः निधिः भवामि। अहं भवतः गृहम् आगन्तुम् इच्छामि । प्रातः क्षपणकरूपेण तत्र आगमिष्यामि । भवान् दण्डेन मम शिरसि ताडयतु । अहं तदा कनकमयः भविष्यामि' इति । अनन्तरं मणिभद्रः स्वापात् उत्तितवान् ।

अनन्तरदिने प्रातः स्वप्नोक्तरीत्या एकः क्षपणकः गृहम् आगतवान् । चारुदत्तः दण्डेन तं क्षपणकं शिरसि ताडितवान् । क्षपणकः कनकमयः भूत्वा भूमौ पतितवान् । चारुदत्तः सर्वं कनकं गृहस्य अन्तः नीतवान् ।

अत्रान्तरे कश्चित् नापितः तत्र आगतवान् । सः प्रवृत्तं सर्वमपि दष्टवान् । एतद् ज्ञात्वा चारुदत्तः नापितं गृहस्य अन्तः आहूय – 'मित्र, अत्र इदानीं भवता यद् दृष्टं तद् अन्यत्र कुत्रापि न वक्तव्यम् इति उक्तवान् । तस्मै उपायनरूपेण किञ्चित् धनमपि दत्तवान् सः ।

नापितः स्वगृहं गत्वा चिन्तितवान् – 'क्षपणकान् दण्डेन ताडयामः चेत् तेषां कनकमयत्वं सेत्स्यति इति तु निश्चितम् । अतः अहमपि तथैव करोमि' इति ।

अनन्तरं प्रातः काले नापितः क्षपणकविहारं गतवान् । तत्रत्यान् सर्वान् अपि क्षपणकान् – 'भवन्तः अद्य मध्याह्ने भोजनार्थं मम गृहम् आगच्छन्त्' इति प्रार्थितवान् ।

क्षणपकाः तु सन्तोषेण अङ्गीकृतवन्तः । मध्याह्ने ते गृहम् आगतवन्तः । नापितः द्वारं पिधाय दण्डेन तेषां शिरसि ताडनम् आरब्धवान् । क्षपणकाः भीत्या रादितुं आरब्धवन्तः । कोलाहलं श्रुत्वा राजभटाः आगतवन्तः । ते नापितं न्यायालयं नीतवन्तः ।

तत्र न्यायाधिकारी नापितं पृष्टवान् – 'किमर्थं भवान् क्षपणकान् ताडितवान्' इति । नापितः चारुदत्तस्य गृहे दृष्टं सर्वमपि उक्तवान् । न्यायाधिकारी चारुदत्तम् आहूय तस्य मुखात् सर्वं वृत्तान्तं ज्ञातवान् । अनन्तरं दुराशापीडितं नापितं शूलम् आरोपितवान् च ।

* * *